**प्लावन** न० प्लु–णिच्–ल्युट् । (उथलान) द्रवद्रव्यस्य समन्ता-द्गतौ “तापनं घृततैलादेः प्लावनं गोरसस्य च । तन्मात्र-मुद्धृतं कुर्य्यात् कठिनं तु पयोदधि” शु०त० । २निमज्जनस-म्पादने ३बहुतरजलसंयोजने च । करणे ल्युट् ङीप् । ४भूतानां धारणाभेदे स्त्री “स्तम्भनी प्लावनी चैव शोषणी भामनी तथा । स्रोचनी च भवन्त्येताः भूतानां पञ्च धारणाः” काशीख० ४४अ० । [माघः १२२६ ।

**प्लावित** त्रि० प्लु–णिच्–क्त । जलादिना समन्तात् व्याप्ते

**प्लाशि** स्त्री प्रकर्षेणाश्नाति भुङ्क्तेऽनया प्र+अश–करणे इ वेदे रस्य लः । शिश्नमूलस्थनाड्याम् यजु० २५।७

**प्लाशुक** पु० प्रकर्षेण आशु कायति भवति कै–क वेदे रस्य लः । प्रकर्षेणाशु पच्यमाने व्रीहौ “प्लाशुकानां व्रीहीणां सविता वै देवानां प्रसविता सवितृप्रसूतः सूय इत्यथ यत् प्लाशुकानां व्रीहीणां क्षिप्रे मा प्रसुवानिति” शत० ब्रा० ५।३।३।२ “प्लाशुनां व्रीवैं गार्हपतं यावत् हृष्टे तदेनमग्निरेव गृहपतिर्गार्हपतमभिपरिणयत्यथ यदा शूनां क्षिप्रे मा परिणयानिति” इस० “प्लाशुकानाम् प्रकर्षेण आशु शीघ्रं पच्यमानानां पुनः प्ररूढानां व्रीहीणाम्” रेफस्य छान्दसो लत्वनिर्देशः । प्रसुवान् प्रसुवन्तु प्रेरयन्तु । प्लाशुकाः पुनःप्ररूढव्रीहय इत्युक्तम् ततो-ऽप्यधिककाले पक्वत्वये पाच्यमानाः षष्टिका व्रीहयःआ-शवः तेषामाशुत्वं च त्रिचतुरमासनियतपरिपाकव्रीह्य-पेक्षम्” भा० ।

**प्लाशुचित्** त्रि० शीघ्रे प्राशु इत्यत्र पाठान्तरं निघण्टुः ।

**प्लिह** गतौ भ्वा०पर०सक०सेट् । प्लेहति अप्लेहीत् पिप्लेह ।

**प्लि(प्ली)हन्** पु० प्लि–कनिन् पृषो० वा दीर्घः । (पिला) १वामकुक्षिपार्श्वस्थे मांसखण्डे तद्वृद्धिहेतुके २रोगभेदे च तन्निदानादि भावप्र० उक्तं यथा

“विदाह्यभिष्यन्दिरतस्य जन्तोः प्रदुष्टमत्यर्थमसृक्कफश्च । प्लीहाभिवृद्धिं कुरुतः प्रवृद्धौ तं प्लीहसंज्ञं गदमामनन्ति । वामे स पार्श्वे परिवृद्धिमेति विशेषतः सीदति चातुरो-ऽत्र । मन्दज्वराग्निः कफपित्तलिङ्गैरुपद्रुतः क्षीण-बलोऽतिपाण्डुः” । विदाहि कुलत्थमाषसर्षपशाकादि । अभिष्यन्दि माहिषं दध्यादि । कफपित्तलिङ्गैरुपद्रुत इ-त्यत्र । प्रदुष्टमत्यर्थमसृक्कफश्चेति संप्राप्तिः असृजः पि-त्तस्य च समानधर्मत्वात् । रक्तजमाह “क्लमो भ्रमो विदाहश्च वैवर्ण्यं गात्रगौरवम् । मोहो रक्तोदरत्वञ्च ज्ञेयं रक्तजलक्षणम्” । पैत्तिकस्य लक्षणमाह “सज्वरः सपिपासश्च सदाहो मोहसंयुतः । पीतगात्रो विशे-षेण प्लीहा पैत्तिक उच्यते” । श्लैष्मिकलक्षणमाह “प्लीहा मन्दव्यथास्थूलः कठिनो गौरवान्वितः । अरो-चकेन संयुक्तः प्लीहा कफज उच्यते” । वातिकमाह “नित्यमानद्धकोष्ठः स्यान्नित्योदावर्त्तपीडितः । वेद-नाभिः परीतश्च प्लीहा वातिक उच्यते” । तमसाध्यमाह “दोषत्रितयरूपोऽन्यः प्लीहाऽसाध्यो भवत्यपि” भावप्र० । तत्रैवान्यत्र तत्स्थानमुक्तं यथा “अथ शरीरावयवविशेषस्य यकृत्प्लीहस्वरूपमाह “अधो दक्षिणतश्चापि हृदयाद्यकृतः स्थितिः । तत्तु रञ्जकपित्तस्य स्थानं शोणितजं मतम्”

**प्ली** गतौ क्र्या० पर० सक० अनिट् । प्लीनाति अप्लैषीत् । अयं धातुः कविकल्पद्रुमे न दृश्यते धातुपाठे पाठान्त-रेऽस्ति । [कुसुमवति वृक्षभेदे शब्दच० ।

**प्लीहघ्न** पु० प्लीहानं हन्ति हन–क । (रोडा) दाडिमतुल्य-

**प्लीहशत्रु** पु० ६त० । प्लीहघ्नवृक्षे अमरः ।

**प्लीहा** स्त्री प्लिह–क पृषो० दीर्घः । प्लीहरोगे भरतः ।

**प्लीहारि** पु० ६त० । अश्वत्थवृक्षे शब्दच० ।

**प्लीहोदर** न० उदररोगभेदे उदरशब्दे ११४८ पृ० दृश्यम् ।

**प्लु** सर्पणे उत्प्लुत्य गतौ च भ्वा०आत्म०सक० अनिट् । प्लवते अप्लोष्ट पुप्लुवे । अयं त्रिमात्रतयोच्चारणे च प्लुतशब्दे सि०कौ० प्लवते इति निर्देशात् । गतौ निघण्टुः ।

**प्लुषि** पु० प्लुष–दाहे किस । १वक्रौ उज्ज्वलद० । २स्नेहे ३दहदाहे संक्षिप्तसारः ।

**प्लुत** न० प्लु–भावे क्त । १अश्वगतिभेदे अमरः । २तिर्य्यग्-गतौ ३लम्फेन गतौ त्रिमात्रकालेनोच्चार्य्ये वर्णे पु० “एक-मात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते । त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्द्धमात्रकम्” प्राचीनकारिका । अस्य ह्रस्वदीर्घाणामिवाकारभेदाभावेन तदुत्तरवर्त्तित्र्यङ्केनैव तथात्वसूचनं न तु लेखनेऽस्याकारविशेषोऽस्ति । प्लुतत्व विधायकानि पा०सूत्राणि सवृत्तिकानि सोदाहरणान्यत्र प्रदर्श्यन्ते “वाक्यस्य टेः प्लुत उदात्तः” पा० इत्यधिकृत्य “प्रत्यभिवादेऽशूद्रे” पा० “अशूद्रविषये प्रत्यभिवादे यद्-वाक्यं तस्य टेः प्लुतः स्यात् । अभिवादये देवदत्तोऽहम् । भो आयुष्मानेधि देवदत्त ३ । स्त्रियान्न अभिवादये गा-र्ग्यहं भो आयुष्मनेधि गार्गि ! । नामगोत्रं वा यत्र प्रत्यभिवादवाक्यान्ते प्रयुज्यते तत्रैव प्लुत इष्यते नेह आयुष्मानेधि भोः । राजन्यविशाञ्चेति वाच्यम् । आयुष्मा-नेधि भोः । आयुष्मानेधीन्द्रवर्मन्३ आयुष्मानेधीन्द्रपालित३।